# Narmadasahasranamastotram

# શ્રીનર્મદાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI narmadA sahasranAmastotra

File name : narmadAsahasranAmastotra.itx

Category : sahasranAma, devii, nadI, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : June 13, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2020

*sanskritdocuments.org*

# શ્રીનર્મદાસહસ્રનામસ્તોત્રમ્

શ્રી ગુરુભ્યો નમઃ ।
ૐ શ્રી ગણેશાય નમઃ ।
શ્રી નર્મદાયૈ નમઃ ।
વિનિયોગઃ
અસ્ય શ્રીનર્મદાસહસ્રનામસ્તોત્રમાલામન્ત્રસ્ય રુદ્ર ઋષિર્વિરાટ્છન્દઃ
શ્રીનર્મદાદેવતા હ્રીં બીજં શ્રીશક્તિઃ સ્વાહાકીલકં
શ્રીનર્મદાપ્રસાદસિદ્ધ્યર્થે પઠને પૂજને સહસ્રાર્ચને ચ વિનિયોગઃ ।

ઋષ્યાદિ ન્યાસઃ
રુદ્રઋષયે નમઃ । શિરસિ
વિરાટ્છન્દસે નમઃ । મુખે
શ્રીનર્મદાદેવતાયૈ નમઃ । હૃદયે
હ્રીં બીજાયૈ નમઃ । ગુહ્યે
શ્રીં શક્તયે નમઃ । પાદયોઃ
સ્વાહા કીલકાય નમઃ । નાભૌ
શ્રીનર્મદાપ્રસાદસિદ્ધ્યર્થે વિનિયોગાય નમઃ । સર્વાઙ્ગે

કરાઙ્ગન્યાસઃ
ૐ હ્રીં શ્રીં નર્મદાયૈ સ્વાહા ઇતિ નવાર્ણમન્ત્રણે ।
અથવા
ૐ નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ । હૃદયાય નમઃ ।
હ્રીં નમઃ તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા ।
ૐ નમઃ મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ ।
નર્મદાયૈ નમઃ અનામિકાભ્યાં નમઃ । કવચાય હુમ્ ।
સ્વાહા નમઃ કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રીં શ્રીં નર્મદાયૈ સ્વાહા
કરતલકરપૃષ્ઠાભ્યાં નમઃ । અસ્ત્રાય ફટ્ ।

મૂલેન ત્રિર્વ્યાપકમ્ ।

ધ્યાનમ્
ધ્યાયે શ્રી સિદ્ધનાથાં ગણવહસરિતાં નર્મદાં શર્મ્મદાત્રીં
શ્યામાં બાલેવ નીલામ્બરમુખનયનામ્ભોજયુગ્મૈકમિન્દુમ્ ।
ચૂડાગ્ચાભીતિમાલાં વરજલકરકાં હસ્તયુગ્મે દધાનાં
તીર્થસ્થાં છત્રહસ્તાં ઝષવરનૃપગાં દેશિકસ્યાસનાગ્રે ॥ ૧॥

નર્મદે હરસમ્ભૂતે હરલિઙ્ગાર્ચનપ્રિયે ।
હરલિઙ્ગાઞ્ચિતતટે જયાદ્યં હર નર્મદે ॥ ૨॥

ઇતિ ધ્યાત્વા યન્ત્રેઽથવા પ્રવાહે માનસોપચારૈઃ સમ્પૂજ્ય
નામસ્તોત્રપાઠં પ્રત્યેક નામમન્ત્રેણ પૂજનં
વા સમાચરેત્, યન્ત્રસ્વરૂપં યથા
શ્રીનર્મદાયૈ નમઃ ।

અથ સહસ્રનામસ્તોત્રમ્ ।
નર્મદા નમનીયા ચ નગેજ્યા નગરેશ્વરી ।
નગમાલાવૃતતટા નગેન્દ્રોદરસંસૃતા ॥ ૧॥

નદીશસઙ્ગતા નન્દા નન્દિવાહનસન્નતા ।
નરેન્દ્રમાલિની નવ્યા નક્રાસ્યા નર્મભાષિણી ॥ ૨॥

નરાર્તિઘ્ના નરેશાની નરાન્તકભયાપહા ।
નરકાસુરહન્ત્રી ચ નક્રવાહનશોભના ॥ ૩॥

નરપ્રિયા નરેન્દ્રાણી નરસૌખ્યવિવર્ધિની ।
નમોરૂપા ચ નક્રેશી નગજા નટનપ્રિયા ॥ ૪॥

નન્દિકેશ્વરસમ્માન્યા નન્દિકેશાનમોહિની ।
નારાયણી નાગકન્યા નારાયણપરાયણા ॥ ૫॥

નાગસન્ધારિણી નારી નાગાસ્યા નાગવલ્લભા ।
નાકિની નાકગમના નારિકેલફલપ્રિયા ॥ ૬॥

નાદેયજલસંવાસા નાવિકૈરભિસંશ્રિતા ।
નિરાકારા નિરાલમ્બા નિરીહા ચ નિરઞ્જના ॥ ૭॥

નિત્યાનન્દા નિર્વિકારા નિઃશઙ્કા નિશ્ચયાત્મિકા ।

નિત્યરૂપા નિઃસ્પૃહા ચ નિર્લોભા નિષ્કલેશ્વરી ॥ ૮॥

નિર્લેપા નિશ્ચલા નિત્યા નિર્ધૂતાનનુમોદિની ।
નિર્મલા નિર્મલગતિર્નિરામયસુવારિણી ॥ ૯॥

નિતમ્બિની ચ નિર્દંષ્ટ્રા નિર્ધનત્વનિવારિણી ।
નિર્વિકારા નિશ્ચયિની નિર્ભ્રમા નિર્જરાર્થદા ॥ ૧૦॥

નિષ્કલઙ્કા નિર્જરા ચ નિર્દોષા નિર્ઝરા નિજા ।
નિશુમ્ભશુમ્ભદમની નિઘ્નનિગ્રહકારિણી ॥ ૧૧॥

નીપપ્રિયા નીપરતા નીચાચરણનિર્દયા ।
નીલકાન્તા નીરવાહા નીલાલકવિલાસિની ॥ ૧૨॥

નુતિપાત્રા નુતિપ્રિયા નુતપાપનિવારિણી ।
નૂતનાલઙ્કારસન્ધાત્રી નૂપુરાભરણપ્રિયા ॥ ૧૩॥

નેપથ્યરઞ્જિતા નેત્રી નેદીયઃસ્વરભાજિની ।
નૈસર્ગિકાનન્દદાત્રી નૈરુજ્યકારિવારિણી ॥ ૧૪॥

નન્દવર્ધિની નન્દયિત્રી નન્દકી નન્દરૂપિણી ।
પરમા પરમેશાના પરાધારા પરમેશ્વરી ॥ ૧૫॥

પદ્માભા પદ્મનયના પદ્મા પદ્મદલપ્રિયા ।
પદ્માક્ષી પદ્મવદના પદ્મમાલાવિભૂષિણી ॥ ૧૬॥

પક્ષાધારા પક્ષિણી ચ પક્ષેજ્યા પરમેશ્વરી ।
પશુપ્રિયા પશુરતા પયઃસમ્મોહકારિણી ॥ ૧૭॥

પથિપ્રિયા પથિરતા પથિની પથિરક્ષિણી ।
પઙ્કકર્કરકૂલા ચ પઙ્કગ્રાહસુસંયુતા ॥ ૧૮॥

પ્રભાવતી પ્રગલ્ભા ચ પ્રભાજિતજગત્તમા ।
અકૃત્રિમપ્રભારૂપા પરબ્રહ્મસ્વરૂપિણી ॥ ૧૯॥

પાપાત્માનાં પાવયિત્રી પાપજાલનિવારિણી ।
પાકશાસનવન્દ્યા ચ પાપસન્તાપહારિણી ॥ ૨૦॥

પિકરૂપા પિકેશી ચ પિકવાક્ પિકવલ્લભા ।
પીયૂષાઢ્યપ્રપાનીયા પીતશ્વેતાદિવર્ણિની ॥ ૨૧॥

પુરન્દરી પુણ્ડ્રધારી પુરુહૂતાભિવન્દિતા ।
પુણ્ડરીકવિશાલાક્ષી પુરુષાર્થપ્રદાયિની ॥ ૨૨॥

પૂતા પૂતોદકા પૂર્ણા પૂર્વગઙ્ગા ચ પૂરિતા ।
પઞ્ચમી પઞ્ચપ્રેમા ચ પણ્ડિતા પઙ્કજેશ્વરી ॥ ૨૩॥

ફલદા ફલરૂપા ચ ફલેજ્યા ફલવર્ધિની ।
ફણિપાલા ફલેશી ચ ફલાવર્જ્યા ફણિપ્રિયા ॥ ૨૪॥

બલા બાલા બ્રહ્મરૂપા બ્રહ્મવિષ્ણુશિવાત્મિકા ।
બદરીફલસન્દોહસંસ્થિતા બદરીપ્રિયા ॥ ૨૫॥

બદર્યાશ્રમસંસ્થા ચ બકદાલ્ભ્યપ્રપૂજિતા ।
બદરીફલસંસ્નેહા બદરીફલતોષિણી ॥ ૨૬॥

બદરીફલસમ્પૂજ્યા બદરીફલભાવિતા ।
બર્હિભીરઞ્જિતા ચૈવ વહુલા વહુમાર્ગગા ॥ ૨૭॥

બાહુદણ્ડવિલાસિની બ્રાહ્મી બુદ્ધિવિવર્ધિની ।
ભવાની ભયહર્ત્રી ચ ભવપાશવિમોચિની ॥ ૨૮॥

ભસ્મચન્દનસંયુક્તા ભયશોકવિનાશિની ।
ભગા ભગવતી ભવ્યા ભગેજ્યા ભગપૂજિતા ॥ ૨૯॥

ભાવુકા ભાસ્વતી ભામા ભ્રામરી ભાસકારિણી ।
ભારદ્વાજર્ષિસમ્પૂજ્યા ભાસુરા ભાનુપૂજિતા ॥ ૩૦॥

ભાલિની ભાર્ગવી ભાસા ભાસ્કરાનન્દદાયિની ।
ભિક્ષુપ્રિયા ભિક્ષુપાલા ભિક્ષુવૃન્દસુવન્દિતા ॥ ૩૧॥

ભીષણા ભીમશૌર્યા ચ ભીતિદા ભીતિહારિણી ।
ભુજગેન્દ્રશયપ્રીતા ભુવિષ્ઠા ભુવનેશ્વરી ॥ ૩૨॥

ભૂતાત્મિકા ભૂતપાલા ભૂતિદા ભૂતલેશ્વરી ।
ભૂતભવ્યાત્મિકા ભૂરિદા ભૂર્ભૂરિવારિણી । ૩૩॥

ભૂમિભોગરતા ભુમિર્ભૂમિસ્થા ભૂધરાત્મજા ।
ભૂતનાથસદાપ્રીતા ભૂતનાથસુપૂજિતા ॥ ૩૪॥

ભૂદેવાર્ચિતપાદાબ્જા ભૂધરાવૃતસત્તટા ।
ભૂતપ્રિયા ભૂપશ્રીર્ભૂપરક્ષિણી ભૂરિભૂષણા ॥ ૩૫॥

ભૃશપ્રવાહા ભૃતિદા ભૃતકાશાપ્રપૂરિતા ।
ભેદયિત્રી ભેદકર્ત્રી ભેદાભેદવિવર્જિતા ॥ ૩૬॥

ભૈરવપ્રીતિપાત્રી ચ ભૈરવાનન્દવર્ધિની ।
ભોગિની ભોગદાત્રી ચ ભોગકૃદ્ભોગવર્ધિની ॥ ૩૭॥

ભૌમપ્રાણિહિતાકાઙ્ક્ષી ભૌમૌષધિવિવર્ધિની ।
મહામાયા મહાદેવી મહિલા ચ મહેશ્વરી ॥ ૩૮॥

મહામોહાપહન્ત્રી ચ મહાયોગપરાયણા ।
મખાનુકૂલા મખિની મખભૂસ્તરભૂષણા ॥ ૩૯॥

મનસ્વિની મહાપ્રજ્ઞા મનોજ્ઞા મનોમોહિની ।
મનશ્ચાઞ્ચલ્યસંહર્ત્રી મનોમલવિનાશિની ॥ ૪૦॥

મદહન્ત્રી મથુમતી મધુરા મદિરેક્ષણા ।
મણિપ્રિયા મનઃસંસ્થા મદનાયુધરૂપિણી ॥ ૪૧॥ var મનીષિણી
મત્સ્યોદરી મહાગર્તા મકરાવાસરૂપિણી ।
માનિની માનદા માન્યા માનૈક્યા માનમાનિની ॥ ૪૨॥

માર્ગદા માર્જનરતા માર્ગિણી ૨૦૦ માર્ગણપ્રિયા ।
મિતામિતસ્વરૂપિણી મિહિકા મિહિરપ્રિયા ॥ ૪૩॥

મીઢુષ્ટમસ્તુતપદા મીઢુષ્ટા મીરગામિની ।
મુક્તપ્રવાહા મુખરા મુક્તિદા મુનિસેબિતા ॥ ૪૪॥

મૂલ્યવદ્વસ્તુગર્ભા ચ મૂલિકા મૂર્તરૂપિણી ।
મૃગદૃષ્ટિર્મૃદુરવા મૃતસઞ્જીવવારિણી ॥ ૪૫॥

મેધાવિની મેઘપુષ્ટિર્મેઘમાનાતિગામિની ।
મોહિની મોહહન્ત્રી ચ મોદિની મોક્ષદાયિની ॥ ૪૬॥

મન્ત્રરૂપા મન્ત્રગર્ભા મન્ત્રવિજ્જનસેવિતા ।
યક્ષિણી યક્ષપાલા ચ યક્ષપ્રીતિવિવદ્ધિની ॥ ૪૭॥

યક્ષવારણદક્ષા ચ યક્ષસમ્મોહકારિણી ।
યશોધરા યશોદા ચ યદુનાથવિમોહિની ॥ ૪૮॥

યજ્ઞાનુકૂલા યજ્ઞાઙ્ગા યજ્ઞેજ્યા યજ્ઞવર્ધિની ।

યાજ્યૌષધિસુસમ્પન્ના યાયજૂકજનૈઃશ્રિતા ॥ ૪૯॥

યાત્રાપ્રિયા યાત્રિકૈઃ સંવ્યાપ્તભૂર્યાત્રિકાર્થદા ।
યુવતી યુક્તપદવી યુવતીજનસન્નુતા ॥ ૫૦॥

યોગમાયા યોગસિદ્ધા યોગિની યોગવર્ધિની ।
યોગિસંશ્રિતકૂલા ચ યોગિનાં ગતિદાયિની ॥ ૫૧॥

યન્ત્રતન્ત્રજ્ઞસઞ્જુષ્ટા યન્ત્રિણી યન્ત્રરૂપિણી ।
રમારૂપા ચ રમણી રતિગર્વવિભઞ્જિની ॥ ૫૨॥

રતિપૂજ્યા રક્ષિકા ચ રક્ષોગણવિમોહિની ।
રમણીયવિશાલાઙ્ગા રઙ્ગિણી રભસોગમા ॥ ૫૩॥

રઘુરાજાર્ચિતપદા રઘુવંશવિવર્ધિની ।
રાકેશવદના રાજ્ઞી રાજભોગવિલાસિની ॥ ૫૪॥

રાજકેલિસમાક્રાન્તા રાગિણી રાજતપ્રમા ।
રસપ્રિયા રાસકેલિવર્ધિની રાસરઞ્જિની ॥ ૫૫॥

રિક્થરેણુકણાકીર્ણા રઞ્જિની રતિગામિની ।
રુચિરાઙ્ગા રુચ્યનીરા રુક્માભરણમૂષિતા ॥ ૫૬॥

રૂપાતિસુન્દરા રેવા રૈઃપ્રદાયિની રૈણવી ।
રોચિષ્મતી રોગહર્ત્રી રોગિણામમૃતોપમા ॥ ૫૭॥

રૌક્ષ્યહર્ત્રી રૌદ્રરૂપા રંહગા રંહણપ્રિયા ।
લક્ષ્મણા લક્ષિણી લક્ષ્મીર્લક્ષણા લલિતામ્બિકા ॥ ૫૮॥

લલિતાલાપસઙ્ગીતા લવણામ્બુધિસઙ્ગતા ।
લાક્ષારુણપદા લાસ્યા લાવણ્યપૂર્ણરૂપિણી ॥ ૫૯॥

લાલસાધિકચાર્વઙ્ગી લાલિત્યાન્વિતભાષિણી ।
લિપ્સાપૂર્ણકરા લિપ્સુવરદા ચ લિપિપ્રિયા ॥ ૬૦॥

લીલાવપુર્ધરા લીલા લીલાલાસ્યવિહારિણી ।
લલિતાદ્રિશિરઃપઙ્ક્તિર્લૂતાદિહારિવારિણી ॥ ૬૧॥

લેખાપ્રિયા લેખનિકા લેખ્યચારિત્રમણ્ડિતા ।
લોકમાતા લોકરક્ષા-લોકસઙ્ગ્રહકારિણી ॥ ૬૨॥

લોલેક્ષણા ચ લોલાઙ્ગા લોકપાલાભિપૂજિતા ।
લોભનીયસ્વરૂપા ચ લોભમોહનિવારિણી ॥ ૬૩।
લોકેશમુખ્યવન્દ્યા ચ લોકબન્ધુપ્રહર્ષિણી ।
વપુષ્મદ્વરરૂપા ચ વત્સલા વરદાયિની ॥ ૬૪॥

વર્ધિષ્ણુવારિનિવહા વક્રાવક્રસ્વરૂપિણી ।
વરણ્ડકસુપાત્રા ચ વનૌષધિવિવર્ધિની ॥ ૬૫॥

વજ્રગર્મા વજ્રધરા વશિષ્ઠાદિમુનિસ્તુતા ।
વામા વાચસ્પતિનુતા વાગ્મિની વાગ્વિકાસિની ॥ ૬૬॥ var વાગ્દેવી
વાદ્યપ્રિયા ચ વારાહી વાગ્યતપ્રિયકૂલિની ।
વાદ્યવર્ધનપાનીયા વાટિકાવર્ધિનીતટા ॥ ૬૭॥

વાનપ્રસ્થજનાવાસા વાર્વટશ્રેણિરઞ્જિતા ।
વિક્રયા વિકસદ્વક્ત્રા વિકટા ચ વિલક્ષણા ॥ ૬૮॥

વિદ્યા વિષ્ણુપ્રિયા વિશ્વમ્ભરા વિશ્વવિમોહિની ।
વિશ્વામિત્રસમારાધ્યા વિભીષણવરપ્રદા ॥ ૬૯॥

વિન્ધ્યાચલોદ્ભવા વિષ્ટિકર્ત્રી ચ વિબુધસ્તુતા ।
વીણાસ્યવર્ણિતયશા વીચિમાલાવિલોલિતા ॥ ૭૦॥

વીરવ્રતરતા વીરા વીતરાગિજનૈર્નુતા ।
વેદિની વેદવન્દ્યા ચ વેદવાદિજનૈઃ સ્તુતા ॥ ૭૧॥

વેણુવેલાસમાકીર્ણા વેણુસંવાદનપ્રિયા ।
વૈકુણ્ઠપતિસમ્પ્રીતા વૈકુણ્ઠલગ્નવામિકા ॥ ૭૨॥

વૈજ્ઞાનિકધિયોર્લક્ષ્યા વૈતૃષ્ણ્યકારિવારિણી ।
વૈધાત્રનુતપાદાબ્જા વૈવિધ્યપ્રિયમાનસા ॥ ૭૩॥

શર્વરી શવરીપ્રીતા શયાલુઃ શયનપ્રિયા ।
શત્રુસમ્મોહિની શત્રુબુદ્ધિઘ્ની શત્રુઘાતિની ॥ ૭૪॥

શામ્ભવી શ્યામલા શ્યામા શારદામ્બા ચ શાર્ઙ્ગિણી ।
શિવા શિવપ્રિયા શિષ્ટા શિષ્ટાચારાનુમોદિની ॥ ૭૫॥

શીઘ્રા ચ શીતલા શીતગન્ધપુષ્પાદિમણ્ડિતા ।
શુભાન્વિતજનૈર્લભ્યા શુનાસીરાદિસેવિતા ॥ ૭૬॥

શૂલિની શૂલધૃક્પૂજ્યા શૂલાદિહરવારિણી ।
શૃઙ્ગારરઞ્જિતાઙ્ગા ચ શૃઙ્ગારપ્રિયનિમ્નગા ॥ ૭૭॥

શૈવલિની શેષરૂપા શેષશાય્યભિપૂજિતા ।
શોભના શોભનાઙ્ગા ચ શોકમોહનિવારિણી ॥ ૭૮॥

શૌચપ્રિયા શૌરિમાયા શૌનકાદિમુનિસ્તુતા ।
શંસાપ્રિયા શઙ્કરી શઙ્કરાચાર્યાદિસેવિતા ॥ ૭૯॥

શંવર્ધિની ષડારાતિનિહન્ત્રી ષટ્કર્મિસંશ્રયા ।
સર્વદા સહજા સન્ધ્યા સગુણા સર્વપાલિકા ॥ ૮૦॥

સર્વસ્વરૂપા સર્વેજ્યા સર્વમાન્યા સદાશિવા ।
સર્વકર્ત્રી સર્વપાત્રી સર્વસ્થા સર્વધારિણી ॥ ૮૧॥

સર્વધર્મસુસન્ધાત્રી સર્વવન્દ્યપદામ્બુજા ।
સર્વકિલ્બિષહન્ત્રી ચ સર્વભીતિનિવારિણી ॥ ૮૨॥

સાવિત્રી સાત્ત્વિકા સાધ્વી સાધુશીલા ચ સાક્ષિણી ।
સિતાશ્મરપ્રતીરા ચ સિતકૈરવમણ્ડિતા ॥ ૮૩॥

સીમાન્વિતા સીકરામ્ભઃસીત્કારાશ્રયકૂલિની ।
સુન્દરી સુગમા સુસ્થા સુશીલા ચ સુલોચના ॥ ૮૪॥

સુકેશી સુખદાત્રી ચ સુલભા સુસ્થલા સુધા ।
સુવાચિની સુમાયા ચ સુમુખા સુવ્રતા સુરા ॥ ૮૫॥

સુધાર્ણવસ્વરૂપા ચ સુધાપૂર્ણા સુદર્શના ।
સૂક્ષ્મામ્બરધરા સૂતવર્ણિતા સૂરિપૂજિતા ॥ ૮૬॥

સૃષ્ટિવર્ધિની ચ સૃષ્ટિકર્તૃભિઃ પરિપૂજિતા ।
સેવાપ્રિયા સેવધિની સેતુબન્ધાદિમણ્ડિતા ॥ ૮૭॥

સૈકતક્ષોણિકૂલા ચ સૈરિભાદિસુખપ્રિયા ।
સોમરૂપા સોમદાત્રી સોમશેખરમાનિતા ॥ ૮૮॥

સૌરસ્યપૂર્ણસલિલા સૌમેધિકજનાશ્રયા ।
સૌશીલ્યમણ્ડિતા સૌમ્યા સૌરાજ્યસુખદાયિની ॥ ૮૯॥

સૌજન્યયુક્તસુલભા સૌમઙ્ગલ્યાદિવર્ધિની ।
સૌભાગ્યદાનનિપુણા સૌખ્યસિન્ધુવિહારિણી ॥ ૯૦॥

સંવિધાનપરા સંવિત્સમ્ભાવ્યપદદાયિની ।
સંશ્લિષ્ટામ્બુધિસર્વાઙ્ગા સન્નિધેયજલાશ્રયા ॥ ૯૧॥

હરિપ્રિયા હંસરૂપા હર્વસંવર્ધિની હરા ।
હનુમત્પ્રીતિમાપન્ના હરિદ્ભૂમિવિરાજિતા ॥ ૯૨॥

હાટકાલઙ્કારભૂષા ચ હાર્યસદ્ગુણમણ્ડિતા ।
હિતસંસ્પર્શસલિલા હિમાંશુપ્રતિબિમ્બિતા ॥ ૯૩॥

હીરકદ્યુતિયુક્તા ચ હીનકર્મવિગર્હિતા ।
હુતિકર્તૃદ્વિજાધારા હૂશ્છર્દનક્ષયકારિણી ॥ ૯૪॥

હૃદયાલુસ્વભાવા ચ હૃદ્યસદ્ગુણમણ્ડિતા ।
હેમવર્ણાભવસના હેમકઞ્ચુકિધારિણી ॥ ૯૫॥

હોતૄણાં પ્રિયકૂલા ચ હોમ્યદ્રવ્યસુગર્ભિતા ।
હંસા હંસસ્વરૂપા ચ હંસિકા હંસગામિની ॥ ૯૬॥

ક્ષમારૂપા ક્ષમાપૂજ્યા ક્ષમાપૃષ્ઠપ્રવાહિની ।
ક્ષમાકર્ત્રી ક્ષમોદ્ધર્ત્રી ક્ષમાદિગુણમણ્ડિતા ॥ ૯૭॥

ક્ષરરૂપા ક્ષરા ચૈવ ક્ષરવસ્ત્વાશ્રયા તથા ।
ક્ષપાકરકરોલ્લાસિની ક્ષપાચરહારિણી ॥ ૯૮॥

ક્ષાન્તા ક્ષાન્તિગુણોપેતા ક્ષામાદિપરિહારિણી ।
ક્ષિપ્રગા ક્ષિત્યલઙ્કારા ક્ષિતિપાલસમાહિતા ॥ ૯૯॥

ક્ષીણાયુર્જનપીયૂષા ક્ષીણકિલ્બિષસેવિતા ।
ક્ષેત્રિયાદિનિયન્ત્રી ચ ક્ષેમકાર્યસુતત્પરા ॥ ૧૦૦॥

ક્ષેત્રસંવર્ધિની ચૈવ ક્ષેત્રૈકજીવનાશ્રયા ।
ક્ષોણીભૃદાવૃતપદા ક્ષૌમામ્બરવિભૂષિતા ॥ ૧૦૧॥

ક્ષન્તવ્યગુણગમ્ભીરા ક્ષન્તુકર્મૈકતત્પરા ।
જ્ઞપ્તિવર્ધનશીલા ચ જ્ઞસ્વરૂપા જ્ઞમાતૃકા ॥ ૧૦૨॥

જ્ઞાનસ્વરૂપવ્યક્તા ચ જ્ઞાતૃસંવર્ધિની તથા ।
અમ્બાશોકાઽઞ્જના ચૈવ અનિરુદ્ધાગ્નિસ્વરૂપિણી ॥ ૧૦૩॥

અનેકાત્મસ્વરૂપા ચામરેશ્વરસુપૂજિતા ।

અવ્યયાક્ષરરૂપા ચાપારાઽગાધસ્વરૂપિણી ॥ ૧૦૪॥

અવ્યાહતપ્રવાહા ચ હ્યવિશ્રાન્તક્રિયાત્મિકા ।
આદિશક્તિરાદિમાયા આકીર્ણનિજરૂપિણી ॥ ૧૦૫॥

આદૃતાત્મસ્વરૂપા ચામોદપૂર્ણવપુષ્મતી ।
આસમન્તાદાર્ષપાદા હ્યામોદનસુપૂર્ણભૂઃ ॥ ૧૦૬॥

આતઙ્કદારણગતિરાલસ્યવાહનસ્થિતા ।
ઇષ્ટદાનમહોદારા ઇષ્ટયોગ્યસુભૂસ્તુતા ॥ ૧૦૭॥

ઇન્દિરારમણારાધ્યા ઇન્દુધૃક્પૂજનારતા ।
ઇન્દ્રાદ્યમરવન્દ્યાઙ્ઘ્રિરિઙ્ગિતાર્થપ્રદાયિની ॥ ૧૦૮॥

ઈશ્વરી ચેતિહન્ત્રી ચ ઈતિભીતિનિવારિણી ।
ઈપ્સૂનાં કલ્પવલ્લરિરુક્થશીલવતી તથા ॥ ૧૦૯॥

ઉત્તાનગતિવાહા ચોચ્ચોચ્ચાવચપદાપગા ।
ઉત્સાહિજનસંસેવ્યા ચોત્ફુલ્લતરુકૂલિની ॥ ૧૧૦॥

ઊર્જસ્વિની ચોર્જિતા ચ ઊર્ધ્વલોકપ્રદાયિની ।
ઋણહર્તૃસ્તોત્રતુષ્ટા ઋદ્ધિતાર્ણનિવારિણી ॥ ૧૧૧॥

ઐષ્ટવ્યપદસન્ધાત્રી ઐહિકામુષ્મિકાર્થદા ।
ઓજસ્વિની હ્યોજોવતી હ્યૌદાર્યગુણભાજિની ॥ ૧૧૨॥

કલ્યાણી કમલા કઞ્જધારિણી કમલાવતી ।
કમનીયસ્વરૂપા ચ કટકાભરણાન્વિતા ॥ ૧૧૩॥

કાશી કાઞ્ચી ચ કાવેરી કામદા કાર્યવર્ધિની ।
કામાક્ષી કામિની કાન્તિઃ કામાતિસુન્દરાઙ્ગિકા ॥ ૧૧૪॥

કાર્તવીર્યક્રીડિતાઙ્ગા કાર્તવીર્યપ્રબોધિની ।
કિરીટકુણ્ડલાલઙ્કારાર્ચિતા કિઙ્કરાર્થદા ॥ ૧૧૫॥

કીર્તનીયગુણાગારા કીર્તનપ્રિયમાનસા ।
કુશાવર્તનિવાસા ચ કુમારી કુલપાલિકા ॥ ૧૧૬॥

કુરુકુલ્લા કુણ્ડલિની કુમ્ભા કુમ્ભીરવાહિની ।
કૂપિકા કૂર્દનવતી કૂપા કૂપારસઙ્ગતા ॥ ૧૧૭॥

કૃતવીર્યવિલાસાઢ્યા કૃષ્ણા કૃષ્ણગતાશ્રયા ।
કેદારાવૃતભૂભાગા કેકીશુકપિકાશ્રયા ॥ ૧૧૮॥

કૈલાસનાથસન્ધાત્રી કૈવલ્યદા ચ કૈટભા ।
કોશલા કોવિદનુતા કોમલા કોકિલસ્વના ॥ ૧૧૯॥

કૌશેયી કૌશિકપ્રીતા કૌશિકાગારવાસિની ।
કઞ્જાક્ષી કઞ્જવદના કઞ્જપુષ્પસદાપ્રિયા ॥ ૧૨૦॥

કઞ્જકાનનસઞ્ચારી કઞ્જમાલાસુસન્ધૃતા ॥

ખગાસનપ્રિયા ખડ્ગપાણિની ખર્પરાયુધા ॥ ૧૨૧॥

ખલહન્ત્રી ચ ખટ્વાઙ્ગધારિણી ખગગામિની ।
ખાદિપઞ્ચમહાભૂતરૂપા ખવર્ધનક્ષમા ॥ ૧૨૨॥

ગણતોષિણી ગમ્ભીરા ગણમાન્યા ગણાધિપા ।
ગણસંરક્ષણપરા ગણસ્થા ગણયન્ત્રિણી ॥ ૧૨૩॥

ગણ્ડકી ગન્ધસલિલા ગઙ્ગા ચ ગરુડપ્રિયા ।
ગલગણ્ડાપહર્ત્રી ચ ગદહારિસુવારિણી ॥ ૧૨૪॥

ગાયત્રી ચૈવ તસ્યાગ્રે ગાધેયાર્ચિતસત્પદા ।
ગાથાપ્રિયા ગાઢવહા ગારુત્મતતટાકિની ॥ ૧૨૫॥

ગિરિજા ગિરીશતનયા ગિરીશપ્રેમવર્ધિની ।
ગીર્વાણી ગીષ્પતિનુતા ગીતિકાપ્રિયમાનસા ॥ ૧૨૬॥

ગુડાકેશાર્ચનપરા ગુરૂરહઃપ્રવાહિની ।
ગેહી સર્વાર્થદાત્રી ચ ગેયોત્તમગુણાન્વિતા ॥ ૧૨૭॥

ગોધના ગોપના ગોપી ગોપાલકસદાપ્રિયા ।
ગોત્રપ્રિયા ગોપવૃતા ગોકુલાવૃતસત્તટા ॥ ૧૨૮॥

ગૌરી ગૌરાઙ્ગિણી ગૌરા ગૌતમી ગૌતમપ્રિયા ।
ઘનપ્રિયા ઘનરવા ઘનૌઘા ઘનવર્ધિની ॥ ૧૨૯॥

ઘનાર્તિહર્ત્રી ઘનરુક્પરિહર્ત્રી ઘનદ્યુતિઃ ।
ઘનપાપૌઘસંહર્ત્રી ઘનક્લેશનિવારિણી ॥ ૧૩૦॥

ઘનસારાર્તિકપ્રીતા ઘનસમ્મોહહારિણી ।

ઘર્માંમ્બુપરિહર્ત્રી ચ ઘર્માન્તઘર્મહારિણી ॥ ૧૩૧॥

ઘર્માન્તકાલસઙ્ક્ષીણા ઘનાગમસુહર્ષિણી ।
ઘટ્ટદ્વિપાર્શ્વાનુગતા ઘટ્ટિની ઘટ્ટભૂષિતા ॥ ૧૩૨॥

ચતુરા ચન્દ્રવદના ચન્દ્રિકોલ્લાસચઞ્ચલા ।
ચમ્પકાદર્શચાર્વઙ્ગી ચપલા ચમ્પકપ્રિયા ॥ ૧૩૩॥

ચલત્કુણ્ડલચિન્મૌલિચક્ષુષી ચન્દનપ્રિયા ।
ચણ્ડમુણ્ડનિહન્ત્રી ચ ચણ્ડિકા ચણ્ડવિક્રમા ॥ ૧૩૪॥

ચારુરૂપા ચારુગાત્રી ચારુચન્દ્રસમાનના ।
ચાર્વીક્ષણા ચારુનાસા ચારુપટ્ટાંશુકાવૃતા ॥ ૧૩૫॥

ચારુચન્દનલિપ્તાઙ્ગા ચાર્વલઙ્કારમણ્ડિતા ।
ચામીકરસુશોભાઢ્યા ચાપખર્પરધારિણી ॥ ૧૩૬॥

ચારુનક્રવરસ્થા ચ ચાતુરાશ્રમ્યજીવિની ।
ચિત્રિતામ્બરસમ્ભૂષા ચિત્રા ચિત્રકલાપ્રિયા ॥ ૧૩૭॥

ચીનકાર્તિક્યસમ્પ્રીતા ચીર્ણચારિત્રમણ્ડના ।
ચુલુમ્બકરણાસક્તા ચુમ્બનાસ્વાદતત્પરા ॥ ૧૩૮॥

ચૂડામણિસુશોભાઢ્યા ચૂડાલઙ્કૃતપાણિની ।
ચૂલકાદિસુભક્ષ્યા ચ ચૂષ્યાસ્વાદનતત્પરા ॥ ૧૩૯॥

ચેતોહરસ્વરૂપા ચ ચેતોવિસ્મયકારિણી ।
ચેતસાં મોદયિત્રી ચ ચેતસામતિપારગા ॥ ૧૪૦॥

ચૈતન્યઘટિતાઙ્ગા ચ ચૈતન્યલીનભાવિની ।
ચોક્ષ્યવ્યવહારવતી ચોદ્યપ્રકૃતિરૂપિણી ॥ ૧૪૧॥

ચોક્ષ્યસ્વરૂપા ચોક્ષ્યાઙ્ગી ચોક્ષ્યાત્મનાં સમીપિની ।
છત્રરૂપા છટાકારા છર્દિની છત્રકાન્વિતા ॥ ૧૪૨॥

છત્રપ્રિયા છન્નમુખી છન્દોનુતયશસ્વિની ।
છાન્દસાશ્રિતસત્કૂલા છાયાગ્રાહ્યા છિદ્રાત્મિકા ॥ ૧૪૩॥ var ચિદાત્મિકા
જનયિત્રી ચ જનની જગન્માતા જનાર્તિહા ।
જયરૂપા જગદ્ધાત્રી જવના જનરઞ્જના ॥ ૧૪૪॥

જગજ્જેત્રી ચ જગદાનન્દિની જગદમ્બિકા ।

જનશોકહરા જન્તુજીવિની જલદાયિની ॥ ૧૪૫॥

જડતાઘપ્રશમની જગચ્છાન્તિવિધાયિની ।
જનેશ્વરનિવાસિની જલેન્ધનસમન્વિતા ॥ ૧૪૬॥

જલકણ્ટકસંયુક્તા જલસઙ્ક્ષોભકારિણી ।
જલશાયિપ્રિયા જન્મપાવિની જલમૂર્તિની ॥ ૧૪૭॥

જલાયુતપ્રપાતા ચ જગત્પાલનતત્પરા ।
જાનકી જાહ્નવી જાડ્યહન્ત્રી જાનપદાશ્રયા ॥ ૧૪૮॥

જિજ્ઞાસુજનજિજ્ઞાસ્યા જિતેન્દ્રિયસુગોચરા ।
જીવાનાં જન્મહેતુશ્ચ જીવનાધારરૂપિણી ॥ ૧૪૯॥

ઝષસઙ્ખ્યાકુલાધાની ઝષરાજાયુતાકુલા ।
ઝઞ્ઝનધ્વનિપ્રીતા ચ ઝઞ્ઝાનિલસમર્દિતા ॥ ૧૫૦॥

ટટ્ટરશ્રવણપ્રીતા ઠક્કુરશ્રવણપ્રિયા ।
ડયનારોહસઞ્ચારી ડમરીવાદ્યસત્પ્રિયા ॥ ૧૫૧॥

ડાકૃતધ્વનિસમ્પ્રીતા ડિમ્બિકાગ્રહણોદ્યતા ।
ઢુણ્ઢિરાજપ્રિયકરા ઢુણ્ઢિરાજપ્રપૂજિતા ॥ ૧૫૨॥

તન્તુવાદ્યપ્રિયા તન્ત્રી તન્ત્રિણી તપમાનિની ।
તરઙ્ગિણી ચ તટિની તરુણી ચ તપસ્વિની ॥ ૧૫૩॥

તપિની ચ તમોહન્ત્રી તપતી તત્ત્વવેદિની ।
તત્ત્વપ્રિયા ચ તન્વઙ્ગી તપોઽર્થીયસુભૂમિકા ॥ ૧૫૪॥

તપશ્ચર્યાવતાં ત્રાત્રી તપિષ્ણુજનવારિણી ।
તન્દ્રાદિવિઘ્નસંહર્ત્રી તમોજાલનિવારિણી ॥ ૧૫૫॥

તાપત્રિતયસંહર્ત્રી તાપાપહારિવારિણી ।
તિતિક્ષુજનસંવાસા તિતિક્ષાવૃત્તિવર્ધિની ॥ ૧૫૬॥

તીવ્રસ્યન્દા તીવ્રગા ચ તીર્થભૂસ્તીર્થિકાશ્રયા ।
તુઙ્ગકેશરકૂલાઢ્યા તુરાસાહાદિભિર્નુતા ॥ ૧૫૭॥

તુર્યાર્થદાનનિપુણા તૂર્ણિની તૂર્ણરંહિણી ।
તેજોમયી તેજસોઽબ્ધિરિતિ નામસમર્ચિતા ॥ ૧૫૮॥

તૈજસાનામથિષ્ઠાત્રી તૈતિક્ષૂણાં સહાયિકા ।
તોષવાર્ધિશ્ચ તોષૈકગુણિની તોષભાજિની ॥ ૧૫૯॥

તોષિકાન્વિતભૂયુક્તપૃષ્ઠિનીપદસંયુતા ।
દત્તહસ્તા દર્પહરા દમયન્તી દયાર્ણવા ॥ ૧૬૦॥

દર્શનીયા દર્શયિત્રી દક્ષિણોત્તરકૂલિની ।
દસ્યુહન્ત્રી દુર્ભરિણી દયાદક્ષા ચ દર્શિની ॥ ૧૬૧॥

દાનપૂજ્યા તથા ચૈવ દાનમાનસુતોષિતા ।
દારકૌઘવતી દાત્રી દારુણાર્તિનિવારિણી ॥ ૧૬૨॥

દારિદ્ર્યદુઃખસંહર્ત્રી દાનવાનીકનાશિની ।
દિણ્ડીરસ્વનસન્તુષ્ટા દિવૌકસસમર્ચિતા ॥ ૧૬૩॥

દીનાનાં ધનસન્દાત્રી દીનદૈન્યનિવારિણી ।
દીપ્તદીપોલ્લાસવતી દીપારાધનસત્પ્રિયા ॥ ૧૬૪॥

દુરારાતિહરા દુઃખહન્ત્રી દુર્વાસઃસન્નુતા ।
દુર્લભા દુર્ગતિહરા દુઃખાર્તિવિનિવારિણી ॥ ૧૬૫॥

દુર્વારવારિનિવહા દુર્ગા દુર્ભિક્ષહારિણી ।
દુર્ગરૂપા ચ દુરન્તદૂરા દુષ્કૃતિહારિણી ॥ ૧૬૬॥

દૂનદુઃખનિહન્ત્રી ચ દૂરદર્શિનિષેવિતા ।
ધન્યા ધનેશમાન્યા ચ ધનદા ધનવર્ધિની ॥ ૧૬૭॥

ધરણીધરમાન્યા ચ ધર્મકર્મસુવર્ધિની ।
ધામિની ધામપૂજ્યા ચ ધારિણી ધાતુજીવિની ॥ ૧૬૮॥

ધારાધરી ધાવકા ચ ધાર્મિકા ધાતુવર્ધિની ।
ધાત્રી ચ ધારણારૂપા ધાવલ્યપૂર્ણવારિણી ॥ ૧૬૯॥

ધિપ્સુકાપટ્યહન્ત્રી ચ ધિષણેન સુપૂજિતા ।
ધિષ્ણ્યવતી ધિક્કૃતાંહા ધિક્કૃતાતતકર્દમા ॥ ૧૭૦॥

ધીરા ચ ધીમતી ધીદા ધીરોદાત્તગુણાન્વિતા ।
ધુતકલ્મષજાલા ચ ધુરીણા ધુર્વહા ધુની ॥ ૧૭૧॥

ધૂર્તકૈતવહારિણી ધૂલિવ્યૂહપ્રવાહિની ।
ધૂમ્રાક્ષહારિણી ધૂમા ધૃષ્ટગર્વાપહા ધૃતિઃ ॥ ૧૭૨॥

ધૃતાત્મની ધૃતિમતી ધૃતિપૂજ્યશિવોદરા ।
ધેનુસઙ્ગતસર્વાઙ્ગા ધ્યેયા ધેનુકજીવિની ॥ ૧૭૩॥

નાનારૂપવતી નાનાધર્મકર્મસ્વરૂપિણી ।
નાનાર્થપૂર્ણાવતારા સર્વનામસ્વરૂપિણી ॥ ૧૭૪॥

॥ ૐ શ્રીનર્મદાર્પણમસ્તુ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Narmadasahasranamastotram*

pdf was typeset on June 13, 2020

Please send corrections to *sanskrit@cheerful.com*